# Bhaja Yatirajam

# યતિરાજસ્તોત્રમ્ ૧ ભજ યતિરાજમ્

## Document Information

Text title : bhajayatirAjam

File name : bhajayatirAjam.itx

Category : deities_misc, stotra, advice

Location : doc_deities_misc

Author : Rangarya

Proofread by : PSA Easwaran

Translated by : http://antaryami.net/darpanam/2013/05/12/bhaja-yathiraja-sthothram/

Description-comments : Ramanuja Sampradaya, (Prayer to Shri Ramanujacharya, advice)

Latest update : September 16, 2013

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# યતિરાજસ્તોત્રમ્ ૧ ભજ યતિરાજમ્

શ્રીરઙ્ગેશયજયાશ્રયકેતુઃ શ્રિતજનસંરક્ષણજીવાતુઃ ।
ભવભયજલધેરેવ હિ સેતુઃ પદ્માનેતુઃ પ્રણતૌ હેતુઃ ॥ ૧॥

ભજ યતિરાજં ભજ યતિરાજં ભજ યતિરાજં ભવભીરો ।
ભજ યતિરાજં ભજ યતિરાજં ભજ યતિરાજં ભવભીરો ॥ ભજ યતિરાજં ...
આદૌ જગદાધારઃ શેષઃ તદનુ સુમિત્રાનન્દનવેષઃ ।
તદુપરિ ધૃતહલમુસલવિશેષઃ તદનન્તરમભવદ્ગુરુરેષઃ ॥ ૨॥ ભજ યતિરાજં ...
ભુઙ્ક્તે વૈષયિકં સુખમન્યઃ પ્રચકાસ્ત્યેવ અનશ્નન્નન્યઃ ।
ઇતિ યસ્તત્વં પ્રાહ વદાન્યઃ તસ્માદધિકઃ કો નુ વદાન્યઃ ॥ ૩॥ ભજ યતિરાજં ...
નષ્ટે નયને કસ્યાલોકઃ ચિત્તે મત્તે કસ્ય વિવેકઃ ।
ક્ષીણે પુણ્યે કઃ સુરલોકઃ કામે ધૂતે કસ્તવ શોકઃ ॥ ૪॥ ભજ યતિરાજં ...
નિશિ વનિતાસુખનિદ્રાલોલઃ પ્રાતઃ પરદૂષણપટુશીલઃ ।
અન્તર્યાતિ નિજાયુષ્કાલઃ કિં જાનાતિ નરઃ પશુલીલઃ ॥ ૫॥ ભજ યતિરાજં ...
કેચિલ્લીલાલાલસગતયઃ કેચિદ્બાલાલાલિતરતયઃ ।
કેચિદ્દોલાયિતહમતયઃ કેઽપિ ન સન્ત્યર્ચિતયતિપતયઃ ॥ ૬॥ ભજ યતિરાજં ...
યાવાનબલો જરયા દેહઃ તાવાન્ પ્રબલો વિષયે મોહઃ ।
વચસિ વિરક્તિઃ શ્રુતિપરિવાહઃ મનસિ હિતસ્ત્વપરોઽપિ વિવાહઃ ॥ ૭॥ ભજ યતિરાજં ...
કલુષનિકાયં લલનાકાયં પશ્યન્મુહ્યસિ સાયં સાયમ્ ।
જહિ જહિ હેયં તદ્વ્યવસાયં સ્મર નિરપાયં ચરમોપાયમ્ ॥ ૮॥ ભજ યતિરાજં ...
રાત્રિંદિવમપિ ભિક્ષાચર્યા કલહાયૈવાગચ્છતિ ભાર્યા ।
મધ્યે બાન્ધવસેવા કાર્યા કથય કદા તવ દેવસપર્યા ॥ ૯॥ ભજ યતિરાજં ...
અન્ધં નયનં ભૂમૌ શયનં મન્દં વચનં મલિનં વદનમ્ ।
તસ્મિન્ કાલે ગોમું સદનં વાઞ્છસિ દત્તતનૂજાનયનમ્ ॥ ૧૦॥ ભજ યતિરાજં ...
તાલચ્છદકૃતકુબ્જકુટીરઃ પ્રતિગૃહસન્ધ્યાકબલાહારઃ ।
વિવિધપટચ્ચરભારઃ ક્રૂરઃ સોઽપિ વિધાતૃસમાહઙ્કારઃ ॥ ૧૧॥ ભજ યતિરાજં ...
મન્ત્રદ્રવ્યવિશુદ્ધો યાગઃ સર્વારમ્ભવિરાગસ્ત્યાગઃ ।

કર્તું શક્યો ન કલૌ યોગઃ કિન્તુ યતીશગુણામૃતભોગઃ ॥ ૧૨॥ ભજ યતિરાજં ...
ઉપરિ મહોપલવર્ષાસારો માર્ગે કણ્ટકકર્દમપૂરઃ ।
કક્ષે ભારઃ શિરસિ કિશોરઃ સુખયતિ ઘોરઃ કં સંસારઃ ॥ ૧૩॥ ભજ યતિરાજં ...
ભજસિ વૃથા વિષયેષુ દુરાશાં વિવિધવિચિત્રમનોરથપાશામ્ ।
કિયદપિ લભસે ન હિ તત્રૈકં કિન્તુ વ્રજસિ મહાન્તં શોકમ્ ॥ ૧૪॥ ભજ યતિરાજં ...
કશ્ચન લોકે કરપુટપાત્રઃ પાતું સુતમાશ્રિતમઠસત્રઃ ।
તસ્મિન્વૃદ્ધે તં સકલત્રઃ શપતિ હિ રણ્ડાસુત ઇતિ પુત્રઃ ॥ ૧૫॥ ભજ યતિરાજં ...
મનુજપતિં વા દિગધિપતિં વા જલજભવં વા જગદધિપં વા ।
મમતાહઙ્કૃતિમલિનો લોકો નિન્દતિ નિન્દતિ નિન્દત્યેવ ॥ ૧૬॥ ભજ યતિરાજં ...
પાપહતો વા પુણ્યયુતો વા સુરનરતિર્યગ્જાતિગતો વા ।
રામાનુજપદતીર્થાન્મુક્તિં વિન્દતિ વિન્દતિ વિન્દત્યેવ ॥ ૧૭॥ ભજ યતિરાજં ...
ગુણગુણિનોર્ભેદઃ કિલ નિત્યઃ ચિદચિદ્દ્વયપરભેદઃ સત્યઃ ।
તદ્દ્વયદેહો હરિરિતિ તત્ત્વં પશ્ય વિશિષ્ટાદ્વૈતં તત્ત્વમ્ ॥ ૧૮॥ ભજ યતિરાજં ...
યતિપતિપદજલગણિકાસેકઃ ચતુરક્ષરપદયુગ્મવિવેકઃ ।
યસ્ય તુ સાલનગર્યવલોકઃ તસ્ય પદેન હતો યમલોકઃ ॥ ૧૯॥ ભજ યતિરાજં ...
ચિન્તય સર્વં ચિદચિદ્રૂપં તનુરિતિ તસ્ય હરેરનુરૂપમ્ ।
તસ્માત્ કસ્મિન્કલયસિ કોપં પશ્ચાદ્ભજસિ દુરાપં તાપમ્ ॥ ૨૦॥ ભજ યતિરાજં ...
યશ્ચતુરક્ષરમન્ત્રરહસ્યં વેદ તમેવ વૃણીહિ સદસ્યમ્ ।
તચ્ચરણદ્વયદાસ્યમુપાસ્યં તદ્વિપરીતં મતમપહાસ્યમ્ ॥ ૨૧॥ ભજ યતિરાજં ...
વૈષ્ણવકુલગુણદૂષણચિન્તાં મા કુરુ નિજકુલશીલાહન્તામ્ ।
યતિપતિરેવ હિ ગુરુરેતેષામિતિ જાનીહિ મહત્વં તેષામ્ ॥ ૨૨॥ ભજ યતિરાજં ...
સુમસુકુમારં શોભિતમારં રતિસુખસારં યુવતિશરીરમ્ ।
ગતજીવિતમતિઘોરવિકારં દૃષ્ટ્વા ગચ્છસિ દૂરં દૂરમ્ ॥ ૨૩॥ ભજ યતિરાજં ...
વિદ્યાનિપુણા વયમિત્યન્યે હૃદ્યા ધનિનો વયમિત્યન્યે ।
સત્કુલજાતા વયમિત્યન્યે તેષુ કલિં પરિપૂર્ણં મન્યે ॥ ૨૪॥ ભજ યતિરાજં ...
યમકિઙ્કરકરમૂલે શૂલે પતદભિયાતિ હિ ફાલે ફાલે ।
દહતિ તનું પ્રતિકૂલે કાલે કં રમયસિ તત્કાલે બાલે ॥ ૨૫॥ ભજ યતિરાજં ...
નરવાહનગજતુરગારૂઙ્આઃ નારીસુતપોષણગુણમૂઢાઃ ।
નાનારઞ્જકવિદ્યાપ્રૌઢાઃ નાગરિકાઃ કિં યતયો મૂઢાઃ ॥ ૨૬॥ ભજ યતિરાજં ...
યસ્ય મુખસ્થા યતિપતિસૂક્તિઃ તસ્ય કરસ્થા વિલસતિ મુક્તિઃ ।
નરકે પતિતં નવનવયુક્તિઃ નહિ રક્ષતિ સામાન્યનિરુક્તિઃ ॥ ૨૭॥ ભજ યતિરાજં ...
શ્રુતિશિરસામત્યન્તવિદૂષ્યં સૂત્રાનભિમતમતિવૈદુષ્યમ્ ।

પ્રથમમ્ મઙ્ગલમનૃતવિશેષ્યં પ્રલપસિ કિં પ્રાકૃતકૃતભાષ્યમ્ ॥ ૨૮॥ ભજ યતિરાજં ...
તસ્કરજારવિદૂષકધૂર્તા મસ્કરિમૌનિદિગમ્બરવૃત્તાઃ ।
ગુમ્ફધનીકૃત ધનમદમત્તાઃ ગુરવઃ કિં પરવઞ્ચકચિત્તાઃ ॥ ૨૯॥ ભજ યતિરાજં ...
કાન્તિમતીસુકુમારકુમારં કેશવયજ્વકિશોરમુદારમ્ । યજ્વ પાઠભેદ સિંહ
રામાનુજમહિરાડવતારં મૂકાન્ધાનપિ મોક્ષયિતારમ્ ॥ ૩૦॥ ભજ યતિરાજં ...
કાષાયામ્બરકવચિતગાત્રં કલિતકમણ્ડલુદણ્ડપવિત્રમ્ ।
વિધૃતશિખાહરિણાજિનસૂત્રં વ્યાખ્યાતદ્વૈપાયનસૂત્રમ્ ॥ ૩૧॥ ભજ યતિરાજં ...
યામુનપૂર્ણકૃપોજ્જ્વલગાત્રં રામાબ્જાક્ષમુનીક્ષણપાત્રમ્ ।
કોમલશઠરિપુપદયુગમાત્રં શ્રીમાધવસેનાપતિમિત્રમ્ ॥ ૩૨॥ ભજ યતિરાજં ...
સાલગ્રામે સર્વહિતાર્થં યેનાસ્થાપિ ગુરોઃ પદતીર્થમ્ ।
તત્કુલદૈવતહિતપુરુષાર્થં સકલોપાયાધિકચરમાર્થમ્ ॥ ૩૩॥ ભજ યતિરાજં ...
પ્રવચનસક્તઃ પ્રજ્ઞાયુક્તઃ પરહિતસક્તઃ પરમવિરક્તઃ ।
નાનાદૈવતભક્ત્યા યુક્તઃ ન ભવતિ મુક્તો ભવતિ ન મુક્તઃ ॥ ૩૪॥ ભજ યતિરાજં ...
સન્ત્યજ સકલમુપાયાચરણં વ્રજ રામાનુજચરનૌ શરણામ્ ।
પશ્યસિ તમસઃ પારં નિત્યં સત્યં સત્યં પુનરપિ સત્યમ્॥ ૩૫॥ ભજ યતિરાજં ...
ભગવદ્રામાનુજષટ્ત્રિંશઃ સાલગ્રામગુરૂત્તમવંશ્યઃ ।
કૌણ્ડિન્યઃ કવિરાહ પવિત્રં રઙ્ગાર્યો યતિરાજસ્તોત્રમ્ ॥ ૩૬॥ ભજ યતિરાજં ...

ઇતિ યતિરાજસ્તોત્રં સમ્પૂર્ણમ્ ।

See the translation (except 25) at
http://antaryami.net/darpanam/2013/05/12/bhaja-yathiraja-sthothram/

Proofread by PSA Easwaran

*Bhaja Yatirajam*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*